# Shri Lakshminarayana Ashtottarashatanamastotram

# શ્રીલક્ષ્મીનારાયણાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Lakshminarayana Ashtottarashata Nama Stotram

File name : lakShmInArAyaNAShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma, vishnu

Location : doc_vishhnu

Transliterated by : Karthik Raman karthik.raman at gmail.com

Proofread by : Karthik Raman karthik.raman at gmail.com

Latest update : December 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનારાયણાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીર્વિષ્ણુઃ કમલા શાર્ઙ્ગી લક્ષ્મીર્વૈકુણ્ઠનાયકઃ ।
પદ્માલયા ચતુર્બાહુઃ ક્ષીરાબ્ધિતનયાઽચ્યુતઃ ॥ ૧॥

ઇન્દિરા પુણ્ડરીકાક્ષા રમા ગરુડવાહનઃ ।
ભાર્ગવી શેષપર્યઙ્કો વિશાલાક્ષી જનાર્દનઃ ॥ ૨॥

સ્વર્ણાઙ્ગી વરદો દેવી હરિરિન્દુમુખી પ્રભુઃ ।
સુન્દરી નરકધ્વંસી લોકમાતા મુરાન્તકઃ ॥ ૩॥

ભક્તપ્રિયા દાનવારિઃ અમ્બિકા મધુસૂદનઃ ।
વૈષ્ણવી દેવકીપુત્રો રુક્મિણી કેશિમર્દનઃ ॥ ૪॥

વરલક્ષ્મી જગન્નાથઃ કીરવાણી હલાયુધઃ ।
નિત્યા સત્યવ્રતો ગૌરી શૌરિઃ કાન્તા સુરેશ્વરઃ ॥ ૫॥

નારાયણી હૃષીકેશઃ પદ્મહસ્તા ત્રિવિક્રમઃ ।
માધવી પદ્મનાભશ્ચ સ્વર્ણવર્ણા નિરીશ્વરઃ ॥ ૬॥

સતી પીતામ્બરઃ શાન્તા વનમાલી ક્ષમાઽનઘઃ ।
જયપ્રદા બલિધ્વંસી વસુધા પુરુષોત્તમઃ ॥ ૭॥

રાજ્યપ્રદાઽખિલાધારો માયા કંસવિદારણઃ ।
મહેશ્વરી મહાદેવો પરમા પુણ્યવિગ્રહઃ ॥ ૮॥

રમા મુકુન્દઃ સુમુખી મુચુકુન્દવરપ્રદઃ ।
વેદવેદ્યાઽબ્ધિ-જામાતા સુરૂપાઽર્કેન્દુલોચનઃ ॥ ૯॥

પુણ્યાઙ્ગના પુણ્યપાદો પાવની પુણ્યકીર્તનઃ ।
વિશ્વપ્રિયા વિશ્વનાથો વાગ્રૂપી વાસવાનુજઃ ॥ ૧૦॥

સરસ્વતી સ્વર્ણગર્ભો ગાયત્રી ગોપિકાપ્રિયઃ ।
યજ્ઞરૂપા યજ્ઞભોક્તા ભક્તાભીષ્ટપ્રદા ગુરુઃ ॥ ૧૧॥

સ્તોત્રક્રિયા સ્તોત્રકારઃ સુકુમારી સવર્ણકઃ ।
માનિની મન્દરધરો સાવિત્રી જન્મવર્જિતઃ ॥ ૧૨॥

મન્ત્રગોપ્ત્રી મહેષ્વાસો યોગિની યોગવલ્લભઃ ।
જયપ્રદા જયકરઃ રક્ષિત્રી સર્વરક્ષકઃ ॥ ૧૩॥

અષ્ટોત્તરશતં નામ્નાં લક્ષ્મ્યા નારાયણસ્ય ચ ।
યઃ પઠેત્ પ્રાતરુત્થાય સર્વદા વિજયી ભવેત્ ॥ ૧૪॥

ઇતિ શ્રી લક્ષ્મીનારાયણાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Karthik Raman karthik.raman at gmail.com

---

*Shri Lakshminarayana Ashtottarashatanamastotram*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*